
# शारदापीठ प्रदीप

## वार्षिक शोध पत्रिका




Scanned with CamScanner

।। प्रज्वालितो ज्ञानमयः प्रदीपः ।।

# शारदापीठ प्रदीप

## वार्षिक शोध-पत्रिका

Grade "B" by NAAC
(CGPA 2.75)

संरक्षक

ज्योतिष् एवं द्वारकाशारदापीठाधीश्वर
अनन्तश्रीविभूषित जगद्गुरु शङ्कराचार्य
**स्वामी श्री स्वरूपानन्द सरस्वती जी महाराज**

प्रकाशक

**दण्डी स्वामी सदानन्द सरस्वती**
श्री द्वारकाधीश संस्कृत एकेडमी
एण्ड इण्डोलॉजिकल रिसर्च इन्स्टीट्यूट
द्वारका - 361335, देवभूमि द्वारका ( गुजरात )

प्रधान सम्पादक

महामहोपाध्याय, ब्रह्मर्षि **डॉ. जयप्रकाश नारायण द्विवेदी** 'विद्यावाचस्पति'
निदेशक
श्री द्वारकाधीश संस्कृत एकेडमी
एण्ड इण्डोलॉजिकल रिसर्च इन्स्टीट्यूट
द्वारका - 361335, देवभूमि द्वारका ( गुजरात )

---

**मकर संक्रान्ति**
वि. संवत् 2071
सन् 2014-15

**अङ्क 34**
डाक व्यय सहित पत्रिका का मूल्य
भारत में 300.00 विदेश में 400.00

Scanned with CamScanner

Grade "B" by NAAC (CGPA 2.75)

।। प्रज्वालितो ज्ञानमयः प्रदीपः ।।

# शारदापीठ प्रदीप

## वार्षिक शोध-पत्रिका

इण्डोलॉजिकल शोध संस्थान, द्वारका
दूरभाष - 02892-234208

प्रकाशक
**स्वामी सदानन्द सरस्वती**
श्री द्वारकाधीश संस्कृत एकेडमी
एण्ड इण्डोलॉजिकल रिसर्च इन्स्टीट्यूट
द्वारका - 361335, देवभूमि द्वारका ( गुजरात )

प्रधान सम्पादक
महामहोपाध्याय, ब्रह्मर्षि **डॉ. जयप्रकाश नारायण द्विवेदी** 'विद्यावाचस्पति'
निदेशक
श्री द्वारकाधीश संस्कृत एकेडमी
एण्ड इण्डोलॉजिकल रिसर्च इन्स्टीट्यूट
द्वारका - 361335, देवभूमि द्वारका ( गुजरात )

---

मुद्रक
अंबिका ऑफसेट
मीठापुर - ३६१ ३४५.
दूरभाष : (०२८९२) २२६५३२

Scanned with CamScanner

|| प्रज्वालितो ज्ञानमयः प्रदीपः ||

# Shardapeeth Pradeep

Annual Reserch Journal
Grade "B" by NAAC
(CGPA 2.75)

Patron
**H.H. Jagadguru Shankaracharya of**
**Jyotish & Dwarka Shardapeeth**
**Swami Swaroopanand Saraswati Ji Maharaj**

Publisher
**Dandi Swami Sadanand Saraswati**
Sri Dwarkadheesh Sanskrit
Academy & Indological Research Institute,
Dwarka - 361335, Devbhumi Dwarka, Gujarat

Chief Editor
Mahamahopadhyay, Brahmarshi
**Dr. Jayprakash Narayan Dwivedi**
Vidyavachaspati
Director of Sri Dwarkadheesh Sanskrit
Academy & Indological Research Institute,
Dwarka - 361335, Devbhumi Dwarka, Gujarat

---

**Makar Sankranti - 2071**
**Vol- 34**
Cost of Magazine with Postage In India - Rs. 300/-
In Foreign Countries - Rs. 400/-
2014 -15

Scanned with CamScanner

Grade "B" by NAAC (CGPA 2.75)

।। प्रज्वालितो ज्ञानमयः प्रदीपः ।।

# Shardapeeth Pradeep

Annual Reserch Journal

Patron
**H.H. Jagadguru Shankaracharya of
Jyotish & Dwarka Shardapeeth
Swami Swaroopanand Saraswati Ji Maharaj**

Publisher
**Dandi Swami Sadanand Saraswati**
Administrator
Sri Dwarkadheesh Sanskrit
Academy & Indological Research Institute,
Dwarka - 361335, Devbhumi Dwarka, Gujarat

Chief Editor
Mahamahopadhyay, Brahmarshi
**Dr. Jaiprakash Narayan Dwivedi**
Vidyavachaspati
Director of Sri Dwarkadheesh Sanskrit
Academy & Indological Research Institute,
Dwarka - 361335, Devbhumi Dwarka, Gujarat

---

Printed at :
**Ambika Offset**
Mithapur - 361 345
Ph. No. : (02892) 226532

ISSN No. 097

संस्कृ
से णिच् ए
करना, वि
चमकाना ः
प्रकाशनावस
होता है ।
में अप्रकाि
क्रम में नि
पूर्वख्यात
काव्यशास्त्री
सैद्धान्तिक
अप्रकाशित
भाषाओं ः
पाठ्यक्रम
कहे जा र
नहीं है ।
देता है ।
**पेटेन्ट** की
लेखों, प्र
में रखकर
से प्राप्त
ध्यात
पत्रिकाओं

Scanned with CamScanner

# विषयानुक्रमणिका

## भाषा माध्यम संस्कृत


क्र.सं. शीर्षक..........पृष्ठ संख्या

१ ---- वैदिकवाङ्मये सृष्टितत्त्वविमर्शः .......... १५

२ ---- न हि व्याकरणापेक्षा वर्तते वैदिकी श्रुतिः .......... २९

३ ---- डॉ. सत्यव्रतशास्त्रिवाङ्मये राष्ट्रियता .......... ३९

४ ---- बौद्धदर्शने प्रत्यक्षप्रमाणविमर्शः .......... ४५

५ ---- श्रीमद्भागवते प्रथमस्कन्धे दृष्टान्तानां निरूपणम् .......... ५१

६. --- देववाणीं मुदाराधयामश्च ताम् .......... ५५

७. --- राष्ट्रमेतत्सदा वर्धतां भारतम् .......... ५६

८. --- वेदे नाट्यशास्त्रस्रोतांसि .......... ५७

९ ---- ऋतुसंहारे ग्राम्यजीवनम् .......... ६४


## भाषा माध्यम अंग्रेजी


Sr.No. Subject .......... Page No.

1 ----- Educational Model from Upanisads Is Applicable Today? .......... 71

2 ----- Yoga And Sadhana : A Complete Vaidic System of Well-being .......... 79

3. ---- Social Contribution of Swaminarayan Sect

4. ---- The Vrttajatisamuccaya,.an Unique .......... 91

Work of Prakrit Prosody .......... 101

5. ---- The Virtues of Kings of Raghuvamsh at a Glance in the Context of Raghuvamsh .......... 107


## भाषा माध्यम हिन्दी


क्र.सं. शीर्षक..........पृष्ठ संख्या

१. --- त्वदीयपादपङ्कजं नमामि देवि नर्मदे! .......... ११७

२. --- महाभारत की शकुन्तला कथा एवं कालिदास की क्रान्तदृष्टि .......... १२३

३. --- आर्ष और अपाणिनीय प्रयोगों का स्वरूप विमर्श .......... १३५

४. --- वेदों में शान्ति की विभावना .......... १४५

५. --- धर्म की ऐतिहासिक भूमिका .......... १५९

६. --- ऋग्वेदप्रातिशाख्य में अनुस्वार का स्वरूप .......... १६५


Scanned with CamScanner

 ISSN No. 0976-26

७. --- न्यायदर्शन में शब्दप्रमाणविचारणा ........ १७५
८. --- शिव कल्पना के आर्येतर विमर्शः ........ १७९

## भाषा माध्यम गुजराती

क्र.सं. -- शीर्षक ........ पृष्ठ सं.
१. --- वैदिक साहित्यमां आख्यानो ........ १९५
२. --- वेदेषु भूजलस्रोतसः विज्ञानविषयः ........ २०२
३. --- शुक्रनीति : એક परिशीलन ........ २११
४. --- संस्कृत साहित्य ........ २२०
५. --- संस्कृतना सन्देशकाव्यो अने तेनी स्वरूप मीमांसा ........ २२५
६. --- संस्कृतना दूतकाव्योमां भौगोलिक चिंतन ........ २३२
७. --- सत्संगिजीवनम्मां सांख्य अने योग निरूपण ........ २३५
८. --- चित्सुखी मते 'स्वप्रकाश बोध' ........ २४२

## प्रवृत्ति परिचय

क्र.सं. शीर्षक ........ पृष्ठ संख्या
१. --- श्री शारदापीठ एवं श्री शारदापीठ विद्यासभा द्वारका की प्रवृत्तियाँ
----- एवं भावी विकास योजनाओं का संक्षिप्त परिचय ........ २५३
२. --- श्री द्वारकाधीश संस्कृत एकेडमी एण्ड इण्डोलॉजिकल
----- रिसर्च इन्स्टीट्यूट की उपलब्धियाँ ........ २५६
३. --- भारतीयसंस्कृतपत्रकारसङ्घः ........ २७०
४. --- पी.एच्. डी. प्राप्त शोध छात्रों की सूची ........ २७१
५. --- पञ्जीकृत शोध छात्रों की सूची ........ २७२
६. --- श्री शारदापीठ विद्यासभा द्वारका सञ्चालित धार्मिक व सामाजिक संस्थाएँ ........ २७०
७. --- श्री शारदापीठ विद्यासभा द्वारका सञ्चालित शैक्षणिक संस्थाएँ ........ २७२
८. --- श्री शारदापीठ विद्यासभा का वर्तमान ट्रस्टी मण्डल ........ २७५
९. --- श्री शारदापीठ विद्यासभा की प्रबन्ध समिति ........ २७५
१०. -- श्री शारदापीठ विद्यासभा की सलाहकार समिति ........ २७६
११. -- श्री शारदापीठ विद्यासभा सञ्चालित आश्रमशाला वरवाला की समिति ........ २७७
१२. -- श्री द्वारकाधीश संस्कृत अकादमी परिवार ........ २७७
१३. -- श्री शारदापीठ विद्यासभा सञ्चालित श्री द्वारकाधीश संस्कृत एकेडमी
----- ए.इ.रि.इ. द्वारका, के प्रकाशित ग्रन्थ ........ २७८

Scanned with CamScanner

# श्रीमद्भागवते प्रथमस्कन्धे दृष्टान्तानां निरूपणम्

डॉ. नरेन्द्रकुमार एल. पण्डया
आचार्यः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी सञ्चालित
संस्कृत कॉलेज, वेरावलम्

संस्कृतवाङ्मये ग्रन्थकाराः व्याख्याकाराः कवयो विवेचकाश्च स्वीयग्रन्थेषु प्रतिपाद्यविषयस्य वैशद्यार्थं दृष्टान्तानां सदृशधर्माणां उपमानानां च प्रयोगेण स्वीयप्रतिपाद्यविषयाणां विशदतामापादयन्ति । न्यायवेदान्तादिदर्शनेषु अपि दृष्टान्तानां भृशं प्रयोगा दृश्यन्ते। परार्थानुमानप्रयोगे पञ्चावयवेषु उदाहरणस्य प्रयोगः वर्तते ।। साहित्यशास्त्रे उपमादयोऽलङ्काराः सादृश्यमूलकाः भवन्ति । सादृश्यधर्मावच्छिन्नानां पदार्थानां प्रयोगेण भूतकालीनानां पदार्थानां वर्तमानकालिकैः प्रत्यक्षायमाणैः पदार्थैः सादृश्यप्रदर्शनेन ज्ञातद्वारा अज्ञातज्ञापनाख्यः शिक्षणपद्धतिप्रकारः अपि आश्रितो भवति । श्रीमद्भगवताख्यं महर्षिकृष्णद्वैपायनव्यासप्रणीतं महनीयं पुराणं अस्ति । तस्य प्रथमस्कन्धे दृष्टान्तरूपेण विविधानां उपमानानां पदरूपेण वाक्यरूपेण वा प्रयोगः दृश्यते । एतेषां दृष्टान्तानां प्रथमादिद्वादशाध्यायेषु प्राधान्यतः निरूपितानां अत्र प्रतिपादनं विधीयते ।

**प्रथमाध्याये दृष्टान्ताः**

प्रथमाध्याये प्रथमश्लोके तेजोवारिमृदां विनिमयः दृष्टान्तरूपेण गृहीतः अस्ति मृगतृष्णिकायां तेजसि वारिबुद्धिः भ्रमरूपा मृषापदार्थः लोकैः अनुभूयते । लौकिकपरीक्षकाणामस्मिन्नर्थे बुद्धिसाम्यं दृश्यते तस्मादेष दृष्टान्तः योग्यः अस्ति । त्रिसर्गस्य मृषात्वसिद्धये अयम् उपयुक्तः दृष्टान्तः वर्तते । अपरः एकः दृष्टान्तः प्रथमाध्यायस्य द्वाविंशे श्लोके शौनकादिभिः सूतः कर्णधारत्वेन दृष्टान्तः निरूपितः । अथ च कलियुगः दुस्तरसागर इव वर्णितः ।

**द्वितीयाध्याये दृष्टान्ताः**

प्रथमस्कन्धस्य द्वितीयाध्याये द्वात्रिंशे श्लोके विश्वात्मा पुरुषः भूतेषु नाना इव

भाति इति निरूपयितुं दारुषु अग्निः नाना भाति इति दृष्टान्तः कथितः ।

**तृतीयाध्याये दृष्टान्तः**

तृतीयाध्याये षड्विंशे श्लोके सत्त्वनिधेः हरेः असंख्या अवतारा भवन्ति इति प्रतिपाद्यं विषयं विशदीकर्तुं महतः सरसः सहस्रशः कुल्याः निःसरन्ति ताः दृष्टान्तीकृताः सन्ति । कुमनीषः जन्तुः परमात्मनः लीलाः अज्ञः नटचर्यामिव न जानातीति (१-३-३७) दृष्टान्तो दत्तः ।

**चतुर्थाध्याये दृष्टान्तः**

हास्तिनपुरे विचरन् शुकदेवः उन्मत्तमूकजडवद् विचरन् आसीत् इति उन्मत्तमूकजडाः अवधूतवेषस्य शुकदेवस्य दृष्टान्तीकृताः (१-४-६) ।

**पञ्चमोध्याये दृष्टान्ताः**

यद् वचः चित्रपदं जगत्पवित्रं हरेर्यशो न प्रगृणीत तद्वायसं तीर्थम् उशन्ति इति कथनेन हरियशोरहितवाक्यानां वायसतीर्थता दृष्टान्तीकृता (१-५-१०) ।

त्रिलोकीपर्यटकस्य नारदस्य देवर्षेः सूर्येण सह तथा आत्मसाक्षिणस्तस्य वायुनासह दृष्टान्तः दत्तः (१-५-७) ।

येन द्रव्येण आमयो जायते तेनैव द्रव्येण तस्य आमयस्य चिकित्सा न भवति इत्यस्य क्रियायोगाः संसृतिहेतवः भवन्ति इत्यत्र दृष्टान्तः दर्शितः (१-५-३२-३) ।

**षष्ठाध्याये दृष्टान्तः**

पूर्वजन्मनः कथायां देवर्षेरू नारदस्य माता तद्योगक्षेमं इच्छती सती अपि न कल्पा आसीत् इति वर्णने योषा दारुमयी यथा इति दृष्टान्तः दर्शितः (१-६-७) ।

मात्रस्पर्शेच्छया आतुरचित्तानां हरिचर्यानुवर्णनं भवसिन्धुप्लवः इति निरूपणे हरिचर्यानुवर्णनस्य दृष्टान्ततया भवसिन्धुप्लवः इति कथितम् (१-६-३५) ।

**सप्तमाध्याये दृष्टान्तः**

कुमारहा अश्वत्थामा अर्जुनं दूराद् विलक्ष्य प्राणपरीप्सुः सन् उर्व्यां यावद्गमं पराद्रवत् इत्यत्र विषये रुद्रभयाद् यथाऽर्कः इति दृष्टान्तः दत्तः अस्ति ।

अर्जुनाश्वत्थामभ्यां विसृष्टयोः अस्त्रयोः तेजसी अन्योन्यं संहत्य अर्कवह्निवत् ववृधाते इति वर्णने अर्कवह्न्योः दृष्टान्तेन प्रलकालः स्मारितः भवति (१-७-१८) ।

द्रौणिनिग्रहप्रसङ्गे एव रशवाबद्धम् आहतं पशुवत् पाशबद्धं तं गुरोः सुतमश्वत्थामानं

Scanned with CamScanner

वामस्वभावा कृष्णा कृपया ननाम इति वर्णने अश्वत्थाम्नः पशुवत् इति दृष्टान्तोऽभिहितः (१-७-४२) ।

**अष्टमाध्याये दृष्टान्तः**

यदुकुले भगवतः श्रीकृष्णस्य प्राकट्यविषये मलयस्येव चन्दनम् इति मलयाचले चन्दनवत् यदुकुले कृष्णः प्रकटितः इत्यत्र चन्दनोपमानेन दृष्टान्तः निरूपितः (१-८-३२)।

यथा पङ्केन पङ्कांभः न मार्ष्टुं शक्यते तथैव एकां भूतहत्यां यज्ञैः मार्ष्टुं न अर्हति कश्चित् इति वर्णने अपि दृष्टान्तः अवलोक्यते (१-८-५२) ।

**नवमाध्याये दृष्टान्तः**

देवव्रतभीष्मं निकषा गच्छन् भगवान् श्रीकृष्णः गुह्यकैः विरोचमानः कुबेर इव व्यरोचत इति वर्णने कुबेरस्य दृष्टान्तः सम्प्रदत्तः (१-९-३) ।

पाण्डवानां यद्यदप्रियं अभवत् तत्सर्वं कालकृतं इति निरूपयन् भीष्मः वायोरिव घनावलिः इति दृष्टान्ती करोति (१-९-१४) ।

भीष्मस्य निर्वाणसमये सर्वे तूष्णीं बभूवुः यथा दिनात्यये वयांसि तूष्णीं भवन्ति तथा इत्यत्र सुन्दरः प्राकृतिकः दृष्टान्तः दृग्गोचरीभवति (१-९-४४) । अथ चाऽस्मिन्नवमाध्याये ४२ श्लोकेऽपि दृष्टान्तः वर्तते ।

**एकादशाध्यायदृष्टान्तः**

आनर्तान् उपव्रज्य हरिः दरवरं पाञ्चजन्यं दध्मौ तदा तस्य करकञ्जसम्पुटे शङ्खः अब्जखण्डे कलहंस इव रराजेति मनोहरः दृष्टान्तः उपन्यस्तः (१-११-२) ।

हरिणा नादितं शङ्खनिनदमाकर्ण्य प्रजास्तं दीपबलिभिः समार्चन् तत्र दवेर्दीपमिवादृताः इति कथनेन सुन्दरः दृष्टान्तः अभिहितः (१-११-४) ।

द्वारकायां प्रविशन् प्रभुः श्रीकृष्णः यथा घनः अर्कोडुपचापवैद्युतैः भाति तथा बभौ इति सुन्दरतया नैसर्गिकिः दृष्टान्तः उपन्यस्तः (१-११-२७) । अत चैकादशेऽस्मिन्नध्याये ५, ९, ३४ श्लोकेषु अपि दृष्टान्ताः सन्ति ।

**द्वादशेध्याये दृष्टान्तः**

युधिष्ठिरस्य सर्वे कामाः सम्पन्नाः तथाऽपि तस्य मनस्तु मुकुन्दे एव आसीत् नान्यपदार्थगतम् यथा क्षुधितस्य इतरे पदार्थाः न मुदं जनयन्ति तथा इत्यत्र सर्वानुभूतः दृष्टान्तः प्रदत्तः अस्ति (१-१२-६) ।

 ISSN No. 0976-2655

द्वादशाध्याये एकोनविंशतितमश्लकात् पञ्चविंशश्लोकान्तं विविधाः उपमाः परीक्षितः कृते सम्प्रदत्ताः सन्ति । ता उपमा अपि दृष्टान्तरूपाः सन्ति (१-१२-१९ तः२५)।

राजपुत्रः परीक्षित् शुक्लपक्षे शशी इव ववृधे इत्यत्र प्रसिद्धः शुक्लपक्षीयचन्द्रस्य दृष्टान्तः सम्प्रदत्तः अस्ति (१-१२-३१) ।

**उपसंहारः**

इत्थम् अत्र श्रीमद्भागवतस्य प्रथमस्कन्धीयद्वादशाध्यायेषु विविधाः दृष्टान्ताः समुपलभ्यन्ते तेषां विमर्शः प्रस्तुतः अस्ति । दृष्टान्तद्वारा प्रतिपाद्यविषयाणां सिद्धान्तानां च नूनं दृढीकरणं जायते इति तु अनुभवसिद्धम् अस्ति विदुषाम् ।

## सन्दर्भग्रन्थः

1. श्रीमद्भागवतमहापुराणम्, प्रका. - गीताप्रेस गोरखपुर, संवत् 2067

Scanned with CamScanner